INDIAN JOURNAL OF HISTORY OF SCIENCE

VOL. 24 October 1989 No. 4

Supplement

RASA RATNA SAMUCCAYA

(Continued)

Eighth Chapter

Sanskrit Text

English Translation

Notes

अथ अष्टमोऽध्यायः

परिभाषाकथनीयम्

परिभाषाकथनम् –

कथ्यते सोमदेवेन मुग्धवैद्यप्रबुद्धये ।
परिभाषा रसेन्द्रस्य शास्त्रैः सिद्धैश्च भाषिता ॥ 1 ॥

धन्वन्तरिभागः –

अर्धं सिद्धरसस्य तैलघृतयोर्लेहस्य भागोऽष्टमः ।
संसिद्धाखिललोहचूर्णवटकादीनां तथा सप्तमः ॥
यो दीयेत भिषग्वराय गदिभिर्निर्दिश्य धन्वन्तरिं ।
सर्वाऽरोग्यसुखाप्तये निगदितो भागः स धन्वन्तरेः ॥ 2 ॥

रुद्रभागः –

भैषज्यक्रीणितद्रव्यभागोऽप्येकादशो हि यः ।
वणिग्भ्यो गृह्यते वैद्ये रुद्रभागः स उच्यते ॥ 3 ॥

विश्वासघातकवैद्यः –

प्रगृह्याऽधिकरुद्रांशैः योऽसमीचीनमौषधम् ।
दापयेल्लुब्धधीर्वैद्यः स स्याद्विश्वासघातकः ॥ 4 ॥

कज्जली –

धातुभिर्गन्धकाद्यैश्च निर्द्रवैर्मर्दितो रसः ।
सुश्लक्ष्णः कज्जलाभोऽसौ कज्जलीत्यभिधीयते ॥ 5 ॥

रसपंकः –

सद्रवा मर्दिता सैव रसपंक इति स्मृतः ॥ 6 ॥

रसपिष्टीप्रथमा –

अर्कांशतुल्याद्रसतोऽथगन्धा –
न्निष्कार्थतुल्यात्कुटितोऽभिखल्ले ।
अर्कातपे तीव्रतरे विमर्द्या
पिष्टी भवेत्सा नवनीतरूपा ॥ 7 ॥

रसपिष्टी द्वितीया –

खल्ले विमर्द्य गन्धेन दुग्धेन सह पारदम् ।
पैषणात्पिष्टतां याति सा पिष्टीति मता परैः ॥ 8 ॥

पातनपिष्टी –

चतुर्थांशसुवर्णेन रसेन कृतपिष्टिका ।
भवेत्पातनपिष्टी सा रसस्योत्तमसिद्धिदा ॥ 9 ॥

हेमतारकृष्टी –

रूप्यं वा जातरूपं वा रसगन्धादिभिर्हतम् ।
समुत्थितंच बहुशः सा कृष्टी हेमतारयोः ॥ 10 ॥
कृष्टीं क्षिपेत्सुवर्णान्तर्न वर्णो हीयते तथा ।

स्वर्णकृष्टीकृतबीजगुणाः –

स्वर्णकृष्ट्या कृतं बीजं रसस्य परिरंजनम् ॥ 11 ॥

वरलोहम् –

ताम्रं तीक्ष्णसमायुक्तं द्रुतं निक्षिप्य भूरिशः ।
सगन्धलकुचद्रावे निर्गतं वरलोहकम् ॥ 12 ॥

हेमरक्ती –

तेन रक्तीकृतं स्वर्णं हेमरक्तीत्युदाहृतम् ॥ 13 ॥
निक्षिप्ता सा द्रुते स्वर्णे वर्णोत्कर्षविधायिनी ।

तारारक्ती –

तारस्य रंजनी चापि बीजरागविधायिनी ॥ 14 ॥
एवमेव प्रकर्तव्या तारारक्ती मनोहरा ।
रंजनी खलु रूप्यस्य बीजानामपि रंजनी ॥ 15 ॥

चन्द्रदलः, अनलदलः –

कृतेन वा बद्धरसेन वाऽन्य-
ल्लोहेन वा साधितमन्यलोहम् ।
सितं च पीतत्वमुपागतं
तद्दलं हि चन्द्रानलयोः प्रसिद्धम् ॥ 16 ॥

सितदलः, पीतदलः –

आभासकृतबद्धेन रसेन सह योजितम् ।
साधितं वाऽन्यलोहेन सितं पीतंच तद्दलम् ॥ 17 ॥

शुल्बनागः –

माक्षिकेण हतं ताम्रं दशवारं समुत्थितम् ।
तद्वद्विशुद्धनागं हि द्वितयं तच्चतुष्पलम् ॥ 18 ॥
नीलांजनहतं भूयः सप्तवारं समुत्थितम् ।
इति संसिद्धमेतद्धि शुल्बनागं प्रकीर्त्यते ॥ 19 ॥

शुल्बनागप्रभावः –

साधितस्तेन सूतेन्द्रो वदने विधृतो नृणाम् ।
निहन्ति मासमात्रेण मेहव्यूहमशेषतः ॥ 20 ॥
पथ्याशनस्य वर्णेण पलितं वलिभिः सह ।
गृध्रदृष्टिर्लसत्पुष्टिः सर्वारोग्यसमन्वितः ॥ 21 ॥

पिंजरी–

लोहं लोहान्तरे क्षिप्तं ध्मातं निर्वापितं द्रवे ।
पाण्डुपीतप्रभं जातं पिंजरीत्यभिधीयते ॥ 22 ॥

चन्द्रार्कः –

भागाः षोडश तारस्य तथा द्वादश भास्वतः ।
एकत्रावर्तितास्तेन चन्द्रार्कमिति कथ्यते ॥ 23 ॥

निर्वापणं/निर्वाहणम् –

साध्यलोहेऽन्यलोहंचेत्प्रक्षिप्तं वंकनालतः ।
निर्वापणं तु तत्प्रोक्तं वैद्यैर्निर्वाहणं तथा ॥ 24 ॥

निर्वापणद्रव्यप्रमाणम् –

क्षिपेन्निर्वापणं द्रव्यं निर्वाह्ये समभागिकम् ।
आवाह्ये वापनीये च भागे दिष्टे च दिष्टवत् ॥ 25 ॥

वारितरम्–

मृतं तरति यत्तोये लोहं वारितरं हि तत् ॥ 26 ॥

रेखापूर्णम् –

अंगुष्ठतर्जनीघृष्टं यत्तद्रेखान्तरे विशेत् ।
मृतलोहं तदुद्दिष्टं रेखापूर्णाभिधानतः ॥ 27 ॥

अपुनर्भवम्–

गुडगुंजासुखस्पर्शमध्वाज्यैः सह योजितम् ।
नायाति प्रकृतिं ध्मानादपुनर्भवमुच्यते ॥ 28 ॥

उत्तमम्–

तस्योपरि गुरुद्रव्यं धान्यं चोपनयेद्ध्रुवम् ।
हंसक्तीर्यति वारिण्युत्तमं परिकीर्तितम् ॥ 29 ॥

निरुत्थम्–

रौप्येण सह संयुक्तं ध्मातं रौप्येण नो लगेत् ।
तदा निरुत्थमित्युक्तं लोहं तदपुनर्भवम् ॥ 30 ॥

बीजम्–

निर्वापणविशेषेण तत्तद्वर्णं भवेद्यदा ।
मृदुलं चित्रसंस्कारं तद्बीजमिति कथ्यते ।।

उत्तरणम्–

इदमेव विनिर्दिष्टं वैद्यैरुत्तरणं खलु ॥ 31 ॥

ताडनम्–

संसृष्टलोहयोरेकलोहस्य परिणाशनम् ।
प्रध्मानात् वंकनालेन तत्ताडनमुदाहृतम् ॥ 32 ॥

धान्याभ्रम्–

चूर्णाभ्रं शालिसंयुक्तं वस्त्रबद्धं हि कांजिके ।
नियातं मर्दनाद्वस्त्राद्धान्याभ्रमिति कथ्यते ॥ 33 ॥

सत्त्वम्–

क्षाराम्लद्रावकैर्युक्तं ध्मातमाकरकोष्ठके ।
यस्ततो निर्गतः सारः सत्त्वमित्यभिधीयते ॥ 34 ॥

एककोलीसकः –

कोष्ठिकाशिखरापूर्णैः कोकिलैर्ध्मानयोगतः ।
मूषाकण्ठमनुप्राप्तैरेककोलीसको मतः ॥ 35 ॥

भिन्नभिन्नकाष्ठोपयोगाः –

द्रावणे सत्त्वपाते च माधुकाः खादिराः शुभाः ।
निर्द्रवि वंशजास्ते तु स्वेदने बादराः शुभाः ॥ 36 ॥

हिंगुलाकृष्टरसः –

विद्याधराख्ययन्त्रस्थादार्द्रकद्रवमर्दितात् ।
समाकृष्टो रसो योऽसौ हिंगुलाकृष्ट उच्यते ॥ 37 ॥

घोषाकृष्टं ताम्रम् –

स्वल्पतालयुतं कांस्यं वंकनालेन ताडितम् ।
मुक्तरंगं हि तत्ताम्रं घोषाकृष्टमुदाहृतम् ॥ 38 ॥

वरनागम्–

तीक्ष्णं नीलांजनोपेतं ध्मातं हि बहुशो दृढ़म् ।
मृदु कृष्णं द्रुतद्रावं वरनागं तदुच्यते ॥ 39 ॥

उत्थापनम् –

मृतस्य पुनरुद्भूतिः सम्प्रोक्तोत्थापनाख्यया ।

ढालनम् –

द्रुतद्रव्यस्य निक्षेपो द्रवे तद् ढालनं मतम् ॥ 40 ॥

नागसम्भूतचपलः –

त्रिंशत्पलमितं नागं भानुदुग्धेन मर्दितम् ।
विमर्द्य पुटयेत्तावद्यावत्कर्षांशशेषितम् ॥ 41 ॥
न तत्पुटसहस्रेण क्षयमायाति सर्वथा ।
चपलोऽयं समादिष्टो वार्तिकैर्नागसम्भवः ॥ 42 ॥

वंगसम्भूतचपलः –

इत्थं हि चपलः कार्यो वंगस्यापि न संशयः ।

तस्य प्रभावः –

तत्स्पृष्टहस्तसंस्पृष्टः केवलो बध्यते रसः ॥ 43 ॥
स रसो धातुवादेषु शस्यते न रसायने ।
अयं हि खर्वणाख्येन लोकनाथेन कीर्तितः ॥ 44 ॥

धौतम् –

भूभुजंगशकृत्तोयैः प्रक्षाल्याप्तं रजः ।
कृष्णवर्णं हि तत्प्रोक्तं धौताख्यं रसवादिभिः ॥ 45 ॥

द्वन्द्वानम् –

द्रव्ययोर्मर्दनाद्ध्मानाद्द्वन्द्वानं परिकीर्तितम् ॥ 46 ॥

अनुवर्णसुवर्णके –

भागाद्द्रव्याधिकक्षेपमनुवर्णसुवर्णके ॥ 47 ॥

भंजनी –

द्रवैर्वा वह्निकाद्दासो भंजनी वादिभिर्मता ॥ 48 ॥

चुल्लिका –

पतंगीकल्कतो जाता लोहे तारे च हेमता ॥ 49 ॥
दिनानि कतिचित्स्थित्वा यात्यसौ चुल्लिका मता ॥ 50 ॥

पतंगीरागः –

रंजिताद्धि चिराल्लोहाद्ध्मानाद्वा चिरकालतः ।
विनिर्यासः स निर्दिष्टः पतंगीरागसंज्ञकः ॥ 51 ॥

आवापः/प्रतिवापः/आच्छादनम् –

द्रुते द्रव्यान्तरक्षेपो लोहाये क्रियते हि यः ।
स आवापः प्रतिवापस्तदेवाऽच्छादनं मतम् ॥ 52 ॥

अभिषेकः –

द्रुते वह्निस्थिते लोहे विरम्याष्टनिमेषकम् ।
सलिलस्य परिक्षेपः सोऽभिषेक इति स्मृतः ॥ 53 ॥

निर्वापः/स्नपनम् –

तप्तस्याप्सु विनिक्षेपो निर्वापः स्नपनंच तत् ॥ 54 ॥
प्रतिवापादिकं कार्यं द्रुते लोहे सुनिर्मले ॥ 55 ॥

शुद्धावर्तः –

यदा हुताशो दीप्तार्चिः शुक्लोत्थानसमन्वितः ।
शुद्धावर्तस्तदा ज्ञेयः स कालः सत्त्वनिर्गमे ॥ 56 ॥

बीजावर्तः –

द्राव्यद्रव्यनिभा ज्वाला दृश्यते ध्मने यदा ।
द्रावस्योन्मुखता सेयं बीजावर्तः स उच्यते ॥ 57 ॥

स्वांगशीतः –

वह्निस्थमेव शीतं यत्तदुक्तं स्वांगशीतलम् ।

बहिःशीतः –

अग्नेराकृष्य शीतं यत्तद्बहिःशीतमुच्यते ॥ 58 ॥

स्वेदनम् –

क्षराम्लैरौषधैर्वापि दोलायन्त्रे स्थितस्य हि ।
पचनं स्वेदनाख्यं स्यान्मलशैथिल्यकारकम् ॥ 59 ॥

मर्दनम् –

उदितैरौषधैः सार्धं सर्वाम्लैः कांजिकैरपि ।
पेषणं मर्दनाख्यं स्याद्बहिर्मलविनाशनम् ॥ 60 ॥

मूर्च्छनम्–

मर्दनाऽदिष्टभैषज्येर्नष्टपिष्टत्वकारकम् ।
तन्मूर्च्छनं हि वंगाहिभूजकंचुकनाशनम् ॥ 61 ॥

उत्थापनम् –

स्वेदातपादियोगेन स्वरूपापादनं हि यत् ।
तदुत्थापनमित्युक्तं मूर्च्छाव्यापत्तिनाशनम् ॥ 62 ॥

नष्टपिष्टः–

स्वरूपस्य विनाशेन पिष्टत्वाद्बन्धनं हि यत् ।
विद्वद्भिर्निर्जितः सूतो नष्टपिष्टः स उच्यते ॥ 63 ॥

पातनम् –

उक्तौषधैर्मर्दितपारदस्य
यन्त्रस्थितस्योर्ध्वमधश्च तिर्यक् ।
निर्यातनं पातनसंज्ञमुक्तं
वंगाहिसम्पर्कजकंचुकघ्नम् ॥ 64 ॥

रोधनम्–

जलसैन्धवयुक्तस्य रसस्य दिवसत्रयम् ।
स्थितिरास्थापनी कुम्भे याऽसौ रोधनमुच्यते ॥ 65 ॥

नियमनम्–

रोधनाल्लब्धवीर्यस्य चपलत्वनिवृत्तये ।
क्रियते पारदे स्वेदः प्रोक्तं नियमनं हि तत् ॥ 66 ॥

दीपनम् –

धातुपाषाणमूलाद्यैः संयुक्तो घटमध्यगः ।
ग्रासार्धं त्रिदिनं स्वेद्यो दीपनं तन्मतं बुधैः ॥ 67 ॥

ग्रासमानम् –

इयन्मानस्य सूतस्य भोज्यद्रव्यात्मिका मितिः ।
इयतीत्युच्यते याऽसौ ग्रासमानं समीरितम् ॥ 68 ॥

जारणायास्त्रिरूपत्वम् –

ग्रासस्य चारणं गर्भे द्रावणं जारणं तथा ।
इति त्रिरूपा निर्दिष्टा जारणा वरवार्तिकैः ॥ 69 ॥

---

1. नष्टपिष्टिः

जारणास्वरूपभेदाः –

ग्रासःपिण्डःपरिणामस्तिस्रश्चाख्याः पराः पुनः ॥ 70 ॥

जारणाप्रकाराः –

समुखा निर्मुखा चेति जारणा द्विविधा पुनः ॥ 71 ॥

निर्मुख जारणा –

निर्मुखा जारणा प्रोक्ता बीजाऽदानेन भागतः ॥ 72 ॥

बीजम् –

शुद्धं स्वर्णंच रुप्यंच बीजमित्यभिधीयते ॥ 73 ॥

मुखम् –

चतुःषष्टयंशतो बीजप्रक्षेपो मुखमुच्यते ॥ 74 ॥

रसस्यमुखीकरणम् (समुखजारणा) –

एवं कृते रसो ग्रासलोलुपो मुखवान् भवेत् ।
कठिनान्यपि लोहानि क्षमो भवति भक्षितुम् ॥ 75 ॥
इयं हि समुखा प्रोक्ता जारणा मृगचारिणा ॥ 76 ॥

राक्षसवक्त्ररसलक्षणम् –

दिव्यौषधिसमायोगात्स्थितः प्रकटकोष्ठिषु ।
भुंजीताखिललोहाद्यं योऽसौ राक्षसवक्त्रवान् ॥ 77 ॥

चारणा –

रसस्य जठरे ग्रासक्षेपणं चारणा मता ॥ 78 ॥

गर्भद्रुतिः –

ग्रस्तस्य द्रावणं गर्भे गर्भद्रुतिरुदाहृता ॥ 79 ॥

बाह्यद्रुतिः –

बहिरेव द्रुतं कृत्वा घनसत्त्वादिकं खलु ।
जारणाय रसेन्द्रस्य सा बाह्यद्रुतिरुच्यते ॥ 80 ॥

द्रुतिलक्षणम् –

औषधाध्मानयोगेन लोहधात्वादिकं तथा ।
सन्तिष्ठते द्रवाकारं सा द्रुतिः परिकीर्तिता ॥ 81 ॥

द्रुतेः पंचधालक्षणम् –

निर्लेपत्वं द्रुतत्वं च तेजस्त्वं लघुता तथा ।
असंयोगश्च सूतेन पंचधा द्रुतिलक्षणम् ॥ 82 ॥

जारणालक्षणम् –

द्रुतग्रासपरीणामो बिडयन्त्रादियोगतः ।
जारणेत्युच्यते तस्याः प्रकाराः सन्ति कोटिशः ॥ 83 ॥

विडलक्षणम् –

क्षारैरम्लैश्च गन्धाद्यैर्मूत्रैश्च पटुभिस्तथा ।
रसग्रासस्य जीर्णार्थं तद्विडं परिकीर्तितम् ॥ 84 ॥

रंजनलक्षणम् –

सुसिद्धबीजधात्वादिजारणेन रसस्य हि ।
पीतादिरागजननं रंजनं परिकीर्तितम् ॥ 85 ॥

सारणालक्षणम् –

सूते सतैलयन्त्रस्थे स्वर्णादिक्षेपणं हि यत् ।
वेधाधिक्यकरं लोहे सारणा सा प्रकीर्तिता ॥ 86 ॥

वेधलक्षणम् –

व्यवायिभेषजोपेतो द्रव्ये क्षिप्तो रसः खलु ।
वेध इत्युच्यते तज्ञैः स चानेकविधः स्मृतः ॥ 87 ॥

वेधप्रकाराः –

लेपः क्षेपश्च कुन्तश्च धूमाख्यः शब्दसंज्ञकः ॥ 88 ॥

लेपवधः –

लेपेन कुरुते लोहं स्वर्णं वा रजतं तथा ।
लेपवेधः स विज्ञेयः पुटमत्र च सौकरम् ॥ 89 ॥

क्षेपवेधः –

प्रक्षेपणं द्रुते लोहे वेधः स्यात्क्षेपसंज्ञितः ॥ 90 ॥

कुन्तवेधः –

सन्दंशधृतसूतेन द्रुतद्रव्याह्वतिश्च या ।
सुवर्णत्वादिकरणी कुन्तवेधः स उच्यते ॥ 91 ॥

धूमवेधः –

वह्नौ धूमायमानेऽन्तः प्रक्षिप्तरसधूमतः ।
स्वर्णाद्यापादनं लोहे धूमवेधः स उच्यते ॥ 92 ॥

शब्दवेधः –

मुखस्थितरसेनाल्पलोहस्य ध्मनात्खलु ।
स्वर्णरुप्यत्वजननं शब्दवेधः स कीर्तितः ॥ 93 ॥

उद्धाटनम् –

सिद्धद्रव्यस्य सूतेन कालुष्यादिनिवारणम् ।
प्रकाशनंच वर्णस्य तदुद्धाटनमीरितम् ॥ 94 ॥

भूमिस्वेदनम् –

क्षाराम्लैरौषधैः सार्द्धं भाण्डं रुद्ध्वाऽतियत्नतः ।
भूमौ निखन्यते यत्नात्स्वेदनं सम्प्रकीर्तितम् ॥ 95 ॥

सन्यासः –

रसस्यौषधयुक्तस्य भाण्डरुद्धस्य यत्नतः ।
मन्दाग्नियुतचुल्ल्यन्तः क्षेपः सन्यास उच्यते ॥ 96 ॥

द्वयोः प्रभावनिरूपणम् –

द्वावेतौ स्वेदसंन्यासौ रसराजस्य निश्चितम् ।
गुणप्रभावजनकौ शीघ्रव्याप्तिकरौ तथा ॥ 97 ॥

परिभाषाज्ञानमाहात्म्यम् –

रसनिगममहाब्धेः सोमदेवः समन्तात्
स्फुटतरपरिभाषानामरत्नानि हृत्वा
व्यरचयदतियत्नातैरिमां कण्ठमालां
कलयतु भिषगग्र्यो मण्डनार्थं सभायाम् ॥ 98 ॥
भवेत्पठितवारोऽयमध्यायो रसवादिना ।
रसकर्माणि कुर्वाणो न स मुह्यति कुत्रचित् ॥ 99 ॥

इति श्री वैद्यपतिसिंहगुप्तस्यसूनोर्वागभटाचार्यस्य कृतौ रसरत्नसमुच्चये रसपरिभाषा कथनं नाम अष्टमोऽध्यायः ॥